E-ISSN-2584-2870 https://doi.org/10.65833/dbs.2026.014

देवभूमि-सौरभम्
Devabhūmisaurabham

Vol 2 Issue 2 July-Dec 2025 Devabhūmisaurabham International Journal of CSU Shri Raghunath Kirti Campus Devprayag Uttarakhand India

# वेदान्तशास्त्रे सांख्यदर्शनस्य प्रासङ्गिकता

**Ishadri Das**

Senior Research Fellow

Department of SankhyaYoga

Central Sanskrit University

E-Mail ID- isha.anisha02@gmail.com

***शोधसारः*** *-उपनिषत् सांख्यतत्त्वविचारे तु अद्वितीया अत्युद्भुता अप्रतिमतमा च। प्रसद्ध्यनुसारं भारतीयदर्शनस्य सर्वेऽपि सिद्धान्ता एव उपनिषदि प्रतिपादिताः सन्ति। सांख्यस्य यत्तत्त्वं गभीरदार्शनिकशैल्या बोधयति तदेव उपनिषत् सारल्येन सारस्येन सावलीलतया च प्रदर्शयन्ती अस्ति उपनिषद इयमपि काचित् अपूर्वता। वैदेशिका अपि उपनिषदो दर्शनमधिगम्य भारतस्य आध्यात्मिकतायाः गाम्भीर्यं जानन्तः मुक्तकण्ठेन प्रशंसन्ते एनां उपनिषदम् ।*

***कूटशब्दाः*** *उपनिषत्, सांख्यदर्शनम्, आत्मा, प्रकृतिः, गुणः, नेमित्त्वम् इत्यादयः ॥*

उपनिषत्साहित्यमेव भारतीयतत्त्वज्ञानस्य दार्शनिकविचारचर्चानाञ्च मूल स्रोतो वरीवर्ति। तत्र उपनिषत्सु प्रतिपादिते दर्शने आत्मज्ञानस्येव प्रामुख्यमस्ति। आत्मज्ञानञ्च नाम आत्मतत्त्वस्य देहादिव्यतिरिक्ततया अवबोधोऽनुभवश्च। अतः **"आत्मा वारे द्रष्टव्यः"1** इत्यत्र आत्मदर्शनशब्देन आत्मनो देहेन्द्रियादि भिन्नत्वेनानुभव एव परामृष्टः अन्यथा चैतन्यस्वरूपस्यात्मनः अनुभवसिद्धत्वेन तदर्थं विधिवाक्यं निष्प्रयोजनं सम्पद्येत। अतएव आत्मतत्त्वस्य देहादिव्यतिरिक्तत्वेन अनुभवस्य दुर्गमत्वात् -

**अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत् ।**

**तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥2**

इत्यादिमन्त्रेणात्मनो मनोऽधिकवेगवत्त्वं देवदुर्लभत्वं प्रतिपादितं संगच्छते। इदं प्रकृतितो वैलक्ष्यणेन पुरुषापरपर्यायस्यात्मनो निरूपणमेव सांख्यदर्शनस्य प्रमुखो विषयः। जडशरीरस्य अनित्यत्वम् आत्मनो नित्यत्वञ्च उपनिषदि जोघुष्यते। तथाहि -

**न जायते म्रियते वा कदाचिन्नायं कुतश्चिन्न बभूव कश्चित्।**

**अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीर ॥3**

प्रकृतिः त्रिगुणमयी पुरुषस्तु निर्गुणः, प्रकृतिः कर्त्री भोक्त्री पुरुषस्तु अकर्ता अभोक्ता च। अनयोरेवं रूपं वैलक्षण्यं निरीक्ष्य उपनिषदि मन्त्रद्रष्टार ऋषयः छायातपशब्दाभ्यां तयोः निर्वचनमकुर्वन्। तथाहि -

**ऋतं पिबन्तो सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे।**

**छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः ॥4**

अत्र छायातपपदं व्याचक्षाणो भाष्यकार आह - **तौ च छायातपाविव विलक्षणौ संसारित्वासंसारित्वेन ब्रह्मविदो वदन्ति कथयन्ति।5** इदमेव प्रकृतिपुरुषयोः वैधर्म्यप्रतिपादनं सांख्यशास्त्रस्य प्रमुखं तत्त्वम्। तथाहि सांख्यकारिकायाम् -

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि।**

**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥6**

**एवमेव असङ्गो ह्ययं पुरुष इत्येवमेवैतद्याज्ञवल्क्या7** इत्यत्र पुरुषस्य प्रतिपादितमसङ्गत्वं सांख्यशास्त्रीयमेव।

छान्दग्योपनिषदि सांख्यसम्मतः सत्कार्यवादः स्पष्टतया व्याख्यातोऽस्ति। तत्रादौ **सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्** इति सत्कार्यं प्रदर्याग्रे **तदैधयेक आहुरसदेवेदमग्र आसीदेकमेवाद्वितीयं तस्मादसता सज्जायत8**इत्यनेन पूर्वपक्षतया असत्कार्य प्रदर्थ्य **कुतस्तु सोम्येवं स्यादिति होवाच कथमसतः सज्जायेतेति9** तत्र विप्रतिप्रत्तिं समुद्भाव्य सत्त्वेवं सोम्येदमग्र आसीदेकमेवाद्वितीयम् इति सिद्धान्तरूपेण सत्कार्यवाद एव प्रमाणीकृतः। तत्रैव अग्ने लोहित शुक्ल- कृष्णभेदेन वर्णत्रयमग्निसूर्यचन्द्रादिषु मूलभूतत्वेन उपवर्ण्यै सांख्योक्ता गुणत्रयप्रक्रियेव प्रकाशिता **यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्यापागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणिरूपाणीत्येव सत्यम्। 10** एतेन त्रीणि रूपाणीत्येव सत्यमिति सिद्धान्तयता निखिलस्यास्य जगतः त्रिगुणविजृम्भितत्वं प्राकृतत्वञ्च सांख्यनयेन व्याख्यातंविलोक्यते। श्वेताश्वतरोपनिषत्तु सांख्यसिद्धान्तं नामग्राहमेव विवृणोति। तत्र नित्यस्यात्मतत्त्वस्य सांख्ययोगाधिगम्यत्वं विशदीकृत्योक्तमस्ति यत् -

**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।**

**तत्कारणं सांख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते कर्मपाशैः ॥11**

यद्यपि शङ्कराचार्यो ब्रह्मसूत्रे **एतेन योगः प्रत्युक्तः 12**इति सूत्रस्य भाष्ये **द्वैतिनो हि ते सांख्या योगाश्च नात्मैकत्वदर्शिनः। यत्तु दर्शनमुक्तं तत्कारणं सांख्ययोगाभिपन्नमिति, वैदिकमेव तत्र ज्ञानं ध्यानञ्च सांख्ययोगशब्दाभ्यामभिलप्यते, प्रत्यासत्तेरित्यवगन्तव्यम्।13**सांख्ययोगशब्दयोरर्थान्तरत्वं साधयति तत्तु केवलाद्वैतसिद्धान्तप्रतिपादनधियैव न तु तत्त्वत इत्यवगन्तव्यम्। तत्र च भावत्यां **संख्या सम्यग् बुद्धिर्वैदिकी तया वर्तन्त इति सांख्यः। 14** इति सांख्यशब्दस्य वैदिकज्ञानापरपर्यायत्वं साधितं तदपि न युक्तिसहम् "रूढिर्योगापहारिणी" इति सिद्धान्तेन योगापेक्षया रुढेर्बलवत्त्वात्। किञ्च संयोगादीनां शक्तिनियामकत्वेन योगशब्दसाहचर्यात् सांख्यशब्दस्य दर्शनवाचकत्वेन सम्मतम्। अत एव तस्यामेवोपनिषदि सांख्यशास्त्रप्रणेतुः कपिलऋषेः नामग्रहणमपि संगच्छते। तथाहि -

**यो योनिं योनिमधितिष्ठत्येको विश्वानि रूपाणि योनीश्च सर्वाः।**

**ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानञ्च पश्येत् ॥15**

अत्र भाष्यकारः कथयति - **कपिलं कनककपिलवर्णं प्रसूतं स्वेनैवोत्पादितं हिरण्यगर्भजनयामास पूर्वमित्यस्यैव जन्मश्रवणात्। अन्यस्य चाश्रवणात् । 16**

उपनिषदि प्रकृतिस्तस्या गुणत्रयी च श्वेताश्वरतोपनिषदि प्रकृतिः सृष्टिकर्तृत्वेन लोहितशुक्लकृष्णवर्णा उपदिष्टा -

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।**

**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥17**

अत्र भाष्यकारः अजां प्रकृतिमिति स्पष्टमेव व्याख्याति। गुणत्रयं न व्याख्याय तोजोबनलक्षणां तां व्यचष्टे एवञ्च अग्रे पुनो दृश्यते यत् -

**मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ।**

**तस्यावयवभूतैस्तु व्याप्तं सर्वमिदं जगत् ॥18**

भाष्यकारः कथयति यत् **जगत्प्रकृतित्वेनाधस्तात् सर्वत्र प्रतिपादिता प्रकृतिमयैवेति विद्याद् विचानीयात्19** इति प्रकृतिं मायापरपर्यायेण जगत्कर्तृत्वेनैवाभिप्रैति. मायायाश्च गुणत्रयविशिष्टत्वं सत्तरजस्तमोरूपस्य गुणत्रयस्य च शुक्ल रक्त कृष्णवर्णवाच्यत्वं प्रसिद्धमेव । अतः उपनिषदि प्रतिपादिताया अजाया लोहितशुक्लकृष्णाया सत्त्वरजस्तमोरूपत्वमेव संगच्छते। एतेन सांख्योक्ता त्रिगुणमयी प्रकृतिरेव उपनिषद्यभिप्रेता प्रमाणीभवति ।

**उपनिषदि ब्रह्मचक्रवर्णने प्रकृतेः नेमित्वम् -**

**तमेकनेमिं त्रिवृत्तं षोडशान्तं शतार्धारं विंशतिप्रत्यराभिः ।**

**अष्टकैः षड्गिर्विश्वरूपैकपाशं त्रिमार्गभेदं द्विनिमित्तैकमोहम् ॥20**

इत्यत्र ब्रह्मचक्रस्य नेमित्वेन प्रकृतिः वर्णिता। तत्र त्रिवृत्शब्देन षोडशान्तपदेन तस्याश्च सांख्योक्तं स्वरूपमेवावसीयते। तथाहि तत्र शाङ्करभाष्ये **त्रिवृतं त्रिभिः सत्त्वरजस्तमोभिः प्रकृतिगुणैर्वृतम् । 21**षोडशको विकारः पञ्चभूतानि एकादशेन्द्रियाणि अन्तः अवसानं विस्तारः समाप्तिर्यस्यात्मनस्तं षोडशान्तम्। किञ्च मन्त्रेऽस्मिन् शतार्धारशब्देन विपर्ययाशक्तितुष्टिसिद्ध्याख्याः पञ्चाशत्प्रत्ययभेदा गृह्यन्ते। एते सांख्यशास्त्रोक्ताः प्रसिद्धा एव। नेमिरूपा एका अजा, तस्याः त्रयो गुणा, षोडशविकाराः, पञ्चाशत्प्रत्ययसर्गा इत्ययं सांख्यदर्शनस्य वर्ण्यविषयः, इत्यत्र न कोऽपि मतिमान् संशयीत । कठोपनिषदि इन्द्रियविषयमनोबुद्धिमहत्तत्त्वाव्यक्तपुरुषरूपेण सांख्योक्ततत्त्वान्येव यथाक्रमं परिगणितानि -

**इन्द्रियेभ्यः परा ह्यर्था ह्यर्थेभ्यश्च परं मनः ।**

**मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः ॥**

**महतः परमव्यक्तमव्यक्तात् पुरुषः परः ।**

**पुरुषान्नपरं किञ्चित्साकाष्ठा सा परा गतिः ॥22**

**उपसंहारः -**उपनिषत् सांख्यतत्त्वविचारे तु अद्वितीया अत्युद्भुता अप्रतिमतमा च। प्रसङ्ख्यनुसारं भारतीयदर्शनस्य सर्वेऽपि सिद्धान्ता एव उपनिषदि प्रतिपादिताः सन्ति। सांख्यस्य यत्तत्त्वं गभीरदार्शनिकशैल्या बोधयति तदेव उपनिषत् सारल्येन सारस्येन सावलीलतया च प्रदर्शयन्ती अस्ति उपनिषद इयमपि काचित् अपूर्वता। वैदेशिका अपि उपनिषदो दर्शनमधिगम्य भारतस्य आध्यात्मिकतायाः गाम्भीर्यं जानन्तः मुक्तकण्ठेन प्रशंसन्ते एनां उपनिषदम्। एतानि तत्त्वानि जीवनस्य वास्तवस्वरूपमभिलक्ष्य विविधसमस्याञ्च स्वीकृत्य यथाप्रसङ्गम् प्रकथितानि । तस्मात्प्रकृष्टसांख्यज्ञानाय सश्रद्धंसभक्तिकञ्च,

सोत्साहं, सेयं परमपातकनाशिनी योगविद्यासम्पन्ना उपनिषत् नूनं परिशीलनीया। अतः भारतीयसंस्कृतिं प्रसारयन्ती प्रचारयन्ती च उपनिषदः सांख्यधारामन्दाकिनी प्रतिपदं प्रतिदिशं च प्रवहत्यतां देदीप्यताम्। एवं रूपेण येयं साख्यदर्शनसरित् उपनिषत्सु कचिद् व्यक्तरूपेण कुत्र वा अव्यक्तरूपेण प्रवहतितमाम्।

**तथ्यसूत्राणि**

1बृहदारण्यकोपनिषद् २.४.५

2 ईशावास्योपनिषद् - ४

३ कठोपनिषद् - १.२.१८

4 कठोपनिषत् - १.३.१

5कठोपनिषदि, शाङ्करभाष्यम्, पृष्ठासंख्या ७४ (गीताप्रेस, कोड ५७८)

6सांख्यकारिका - ११

7 बृहदारण्यकोपनिषद् - ४.३.१५

8छान्दग्योपनिषद् - ६.२.१

9 छान्दग्योपनिषद् - ६.२.२

10 छान्दग्योपनिषद् ६.४.१

11 श्वेताश्वतरोपनिषद् - ६.१३

12 ब्रह्मसूत्रम् २.१.३

13 ब्रह्मसूत्रे योगप्रत्युक्तधिकरणे (२.१.३) शाङ्करभाष्यम्, पृष्ठासंख्या, २४ (वेदान्तदर्शनम, विश्वरूपानन्द स्वामी,

14 ब्रहासूत्रस्य भामतीटीकायाम् - २.१.३

15 श्वेताश्वतरोपनिषद - ५.२

16 श्वेताश्वतरोपनिषदि शाङ्करभाष्ये पृष्ठासंख्या २०४, (गीताप्रेस, कोड ७३)

17 श्वेताश्वतरोपनिषद् ४.५

18 श्वेताश्वतरोपनिषद् ४.१०

19 श्वेताश्वतरोपनिषदि शाङ्करभाष्ये पृष्ठासंख्या १८४, (गीताप्रेस, कोड ७३)

20 श्वेताश्वतरोपनिषद् - १.४

21 श्वेताश्वतरोपनिषदि शाङ्करभाष्ये पृष्ठासंख्या ८४, (गीताप्रेस, कोड ७३)

22 कठोपनिषद् - १.३.१००१९

## सन्दर्भग्रन्थसूची -


1. ईशादि नौ उपनिषत् (शाङ्करभाष्यसमेता)। सं.- (२०६८)। गोरखपुर गीताप्रेस (प्रकाशक एवं मुद्रक) ।
2. ईशावास्योपनिषद् । (२०१४)। आद्याप्रसादमिश्र (सम्पादकः)। अक्षयवटप्रकाशनम्, इलाहाबादः ।
3. उपनिषद्भाष्यम् (प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया कठ-माण्डूक्य-तैत्तिरीय भाष्याणां प्रसिद्धाचार्यान्तरटीकाभिः सटीकतैत्तिरीयवार्तिकन च समलङ्कृतम्)। (२०००)। सुब्रह्मण्यशास्त्री, सं. एस. (सम्पादकः)। वाराणसी श्रीदक्षिणामूर्ति-मठ-प्रकाशन।
4. कठोपनिषद् । (२००८)। ड. सीतानाथगोस्वामी (सम्पादकः)। कलकाता संस्कृत-पुस्तक-भाण्डारः ३८. विधान-सरणी, ७००००६।
5. छान्दोग्योपनिषत् (बङ्गपुस्तकम्, शाङ्करभाष्यसमेता)। (२००२)। दूर्गाचरणसांख्यवेदान्ततीर्थः, महामहोपाध्यायः (अनुवादकः सम्पादकश्च)। कलिकाता देव-साहित्य-कूटीर-प्राइभेट लिमिटेड ।
6. बृहदारण्यकोपनिषत् । सं.- (२०७०)। गोरखपुर गीताप्रेस (प्रकाशक एवं मुद्रक)।
7. ब्रह्मसूत्रशाङ्कर भाष्यम् । (२०१३)। स्वामी दयानन्दसरस्वती (सम्पादकः)। चौखाम्बासंस्कृत -प्रतिष्ठानं, वाराणसी।
8. श्वेताश्वतरोपनिषद् । द्वितीयसंस्करणम् (२००८), जानुयारिमासः। विश्वरूपानन्दसरस्वती, स्वामी
9. (व्याख्याकार अनुवादकश्च)। मुम्बई सत्साहित्य-प्रकाशन-ट्रस्ट ।
10. सांख्यकारिका । (२००६)। सन्तनारायण श्रीवास्तवः (सम्पादकः)। सुदर्शनप्रकाशनम्, गायियाबाद।